International Journal of Applied Research 2016; 2(5): 192-194



International Journal of Applied Research

**ISSN Print:** 2394-7500
**ISSN Online:** 2394-5869
**Impact Factor:** 5.2
IJAR 2016; 2(5): 192-194
www.allresearchjournal.com
Received: 11-03-2016
Accepted: 12-04-2016

**शीलू कुमार प्राध्यापक**
श्री सोमनाथ संस्कृत माह विद्यालय, जींद, हरियाणा, भारत

# कुमारसम्भवे लोककल्याणस्य भावना

**शीलू कुमार प्राध्यापक**

**प्रस्तावना**

महाकवेः कालिदासस्य कुमारसंभवमहाकाव्यस्य प्रमुखप्रयोजनं ताऽकासुरस्य अत्याचारै त्रस्तानां त्रिलोकानां कल्याणार्थं शान्तेः सुव्यवस्थायाश्च स्थापना। अनेने प्रकारेणऽस्मिन् महाकाव्ये लोककल्याणमेव मरममूल्यरूपेन चित्रितम्।

महाकाव्यस्य नामकरणमेव सामाजिकमूल्यरूपेणस्थापितायाः आश्रम व्यवस्थायाः संकेतः करोति यत्र देवाधिदेवशिवः देवी पार्वती च लोककल्याणायैव गृहस्थाश्रमे प्रविशतः स्मः।

**सामाजिकमूल्यानिः**

आश्रमशब्दः 'आ' उपसर्गपपूर्वस्य 'श्रम्' धातोः सृजितः। वैदिक–इण्डैक्सानुसारं आश्रमशब्दः विश्रामस्थाने अर्थे प्रयुक्तः।[1] अर्थात् आश्रमः तद्स्थानमस्ति यत्र प्रयत्नः पूर्यते। ऋग्वैदिकसमाजे आश्रमव्यवस्थायाः उल्लेखः न प्राप्यते किन्तु ग्रहस्पति यत्यादयः शब्दाः प्राप्यन्ते। ये आश्रम– व्यवस्थायाः परिचायकाः। उत्तरवैदिककाले आश्रमव्यवस्थाऽऽसीत्। अस्य सर्वप्रथमः प्रयोग श्वेताश्वरोपनिषदि प्राप्यते।[2] वैदिक–ऋषिभिः मानववस्य सर्वाङ्गीणविकासाय आश्रमव्यवस्था सृजिता स्यात्। अस्मिन् महाकाव्येऽपि आश्रमव्यवस्थायाः सम्यक्दर्शनम् प्राप्नोति।

सर्वप्रथमं ब्रह्मचर्याश्रमः वण्यते। ब्रह्मचर्यस्य प्रमुखनियमाः तप त्यागसंयमाः। कुमारसम्भवे महादेवोऽपि ब्रह्मचर्यव्रती दृष्टः। ब्रह्मचर्यापेक्षिताना त्रीणां तत्त्वानां महादेवः पालनं करोति स्म।[3] अनेनैव प्रकारेण स्वयमेव तपफलदातृत्वेऽपि अष्टमूर्तिशिवः स्वकीयायाः एवं अन्याछवेः समिद्भिः यजनं कुर्वाणः दर्शितः।[4] अन्यत्र शिवः एव ब्रह्मचर्याश्रमवत् दर्शितः यथा कृष्णसारमृगचर्मधार्य, पलाशदण्डेनशोभितः वाक्पटुः ब्रह्मतेजसा पूतः कोऽपि जटाधारी ब्रह्मचर्याश्रभवत् तपोवनेपुविष्टः।[5]

अग्नेः ग्रहस्थाश्रमः वर्णितः अस्मिन् महाकाव्ये। ग्रहस्थाश्रमे त्रिभ्यः ऋणेभ्य मुक्तये प्रयत्नः क्रियते। कुमारसम्भवेऽपि नगाधिराजहिमालयः सपरिवारः गृहस्याश्रमधर्मपालकः दर्शितः।[6] पर्वतराजहिमालयः ससखिं देवीं पार्वतीं शिवस्य सेवार्थम् आदेशितवान्। अत्र शिवस्य हिमालयेन साछर्य–सत्कारम् गृहस्थाश्रमस्य नृयज्ञस्य देवयस्य च परिपालनमेव। अन्यत्र देवीं अरून्धतीं दृष्टवा शिवस्य मनस्यपि गृहस्थाश्रमाय समादरः उत्पन्नः जातः। एवञ्च धार्मिक क्रियासु पत्नी मूलकारणम्।[7] अनेन प्रकारेण धर्मचर्यायै पत्न्याः अनिवार्यता स्वीकृता। सप्तर्षिभिः पार्वतीं महादेवाय अर्थितायां हिमालयस्य वचनमिदं ग्रहस्थाश्रमस्य सार्थक्यम् प्रतिपादयति यत् अहम् अद्य गृहस्थाश्रमस्य फलं प्राप्तवान्।[8]

अग्रेऽस्मिन् महाकाव्ये संन्यासाश्रमस्य प्रतिपादनम्। देवगणः ब्रह्माणम् वदति यत् तारकविनाशाय अस्माकम् ईदृशः सेनापतेः आवश्यकता वर्तते यथा एको मोक्षार्थी संसारस्य निवृतये कर्मबन्धनछेदकधर्मम् प्रति उन्मुखो भवति।

दाम्पत्यजीवनभपि प्राचूर्येण वर्णितमस्मिन् महाकाव्ये। अत्र परिवारिक धरातले शिवशक्त्योः वागर्थवत् वर्णनमस्ति।[9] अर्धनारीश्वरस्वरूपं पतिपत्न्योः रूपे उद्भासितवत्यौ हिमालयमेने दर्शिते। सुमेरूपर्वतस्य मित्रं मर्यादापालकः हिमालयः मेनया सह कुलप्रतिष्ठायै विवाहञ्चकार। अत्र एकतः हिमालवः वररूपेण मर्यादापालकः वर्णितः अपरतः कन्या रूपे मेनाऽपि पिघ्तणम् पवित्रसङ्कल्पेन प्रसूता, मुनीनामपि मान्यस्ति। विवाहसम्बन्धोऽपि आत्मनाम् अनुरूपगुणानाम् आधारभूम्यामधिष्ठितः।

**कामतत्त्वम्**

त्रिलोके शान्त्यर्थं लोकल्याणर्थञ्च ब्रह्मा तारकासुरवधार्थम् प्रर्थिते सति देवैः भावीशिवपुत्रस्य देवसेनापतित्वं कृत्वा युद्धाय परामर्शति। तदनुसार शिवपार्वत्योः समागमाय ईन्द्रः मनसा कामदेवस्यस्मरति। ईन्द्रस्य स्मरणात् कामदेवः सुनरीस्त्रीवत् सुरूपधनुः, आलिङ्गनसमये रतेः कङ्कणाचिहिन्ते स्वकण्ठे धार्य सहचरवसन्तेन सह समुपस्थितो बभूव।

**Correspondence**
**शीलू कुमार प्राध्यापक**
श्री सोमनाथ संस्कृत माह विद्यालय, जींद, हरियाणा, भारत

अत्र प्रथमतः कामरत्योः दम्पतित्वेनोल्लेखः।[10] तदनन्तर शिवेन समाधिभङ्गात् जातेन क्रोधेन भस्मान्ते कामे आक्रशेत्पन्नया इन्द्रियव्यापारावरोधिकया मूर्छया रतिः किञ्चित् कालपर्यन्तम् उपकृतेव बभूव।[11] अस्मिन् महाकाव्ये वशिष्ठारून्धत्योः जीवनस्यापि आदर्शग्रहस्थरूपेण वर्गनमस्ति। महादेवेनाहुताः ते सप्तर्षिः स्व–प्रभामण्डलेन आकाशं देदीप्यमानाः अरून्धत्या सह शीध्रमेव शिवस्य समक्षे प्रकटीबभूवुः। तेषां ऋषीणां मध्ये पत्युः वशिष्ठस्य चरणपातिनीदृष्टिः अरून्धती सिद्धिवत् शोभिता बभूव। अरून्धतीं दृष्ट्वा शिवस्य हृदये नारीं प्रति समादरस्य भावः जाग्रतो बभूव। यतोहि धर्मकार्येषु पत्नी मूलकारणम्। अनेन प्रकारेण तपोनिधेः अरून्धत्याः चरित्रमपि महादेवस्य हृदये पत्नीं प्रति समादरस्य भावं जागरणे समर्थोऽस्ति। आदर्शदम्पतीरूपेण वशिष्ठारून्धत्योः दाम्पत्यजीवनं परस्परोत्कर्षस्य भावेन समलङ्कृतम्। सप्तर्षिणा सह एकाकिन्याः वशिष्ठपत्न्याः समागमनमपि पुरूषबहुले समाजे आत्मशक्त्या शक्तायाः अरून्धत्याः रूपे नार्याः स्थितेः द्योतकमस्ति।[12]

शिवपार्वत्योः अपि अस्मिन् महाकाव्ये विशद् विवेचनमस्ति। तयोः सम्बन्धः वागर्थसम्बन्धवत् वर्णितः। पार्वत्याः विनम्राभिवादनेन स्त्रियः अखण्सौभाग्यस्य वरदानं प्रदत्तवत्यः। विनम्राभिवादनेन स्त्रियः पत्युः अखण्डप्रेमाणं प्राप्नुहि एवं वरं दत्तवत्यः किन्तु महादेवः तामुमाम् अर्धनारीश्वरशरीरे स्थित्य तासाम् आशीर्वादं अतितमम् श्रेष्ठीचकार।[13] अत्र प्राचीनैः नवीनान् भारतीय संस्कृतेः धर्मकर्मणी शिक्ष्यते आशीर्वचनेषु यत पत्न्याः प्रथमोधर्मः पत्युः अखऽप्रेमप्राप्तिकरणम्। यतोहि तदेव संततिसृजनस्य गर्भबीजाम्।

पतिपत्न्योः अखण्ऽप्रेम्णा विश्वास प्रजायते। विश्वासेनैव समर्पणभावः समर्पणभावेनैव द्वौ देहे एकात्मभावं प्राप्नुतः। एवञ्च एकात्मभावनैव पुरूषार्थचतुष्ट्यं लब्ध्वां परमात्मतत्त्वं प्राप्नुवन्ति। अनेनैव प्रकारेण दम्पतेः प्रेम्णा (व्यष्टिभावेन) सफलजगत् एकस्मिन सूत्रे समष्टिरूपेण प्रतिबध्नाति। एवञ्च मानवह्रदयं वसुधैवकुटुम्बकमिति भावेन पूर्यते। ततः वसुधैवकुटुम्बकस्य वीजगर्भः वर्तते दम्पतेः अखण्डप्रेम। सम्प्रति पाश्चात्य संस्कृतेः प्रभावात् भारतेऽपि दाम्पत्यजीवने कषायं जातम्। अतः अस्मिन् विषये कुमारसम्भवः आदर्श। नारीं प्रति भावविषयेऽपि कुमारसम्भवः आदर्शः।

नार्याः त्रीणि रूपाणि प्रख्यानि (1) पुत्री (2) पत्नी (3) माता च राजा हिमवतं पुत्रवानपि सन् पुत्री अधिका प्रियाऽऽसीत् ब्रहमचारी रूप शिवस्य पार्वतीं प्रति कथनमिदं नार्याः प्रतिष्ठां स्थापयति यत् सप्तर्षिणा अर्पितैः पुष्पैश्च गंगाजलैः न तावत् पूतोऽहम् यावत् तव निष्कलङ्कचरित्रैः। नारी तपक्षेत्रेऽपि अग्रगण्या मानिता यथा पार्वत्याः तपः अन्येषां तपसां कृते आदर्शजातम्। शिवः तपस्विन्याः अरून्धतेः सप्तर्षिभिः सह अभिवादयमानः तां सम्मानयति। मनोरथपूर्तोऽपि पुत्र्याः विवाहार्थं हिमवान् पत्नी मेनां स्वीकृत्यर्थं ददर्श।[15] प्रायः गृहस्थाः कन्यादानाय पत्नी प्राधान्यं ददति। हिमालयः अन्तिमस्वीकृतेः प्राक् सहमत्यर्थं स्वपुत्रीम् आवाहयति।[16] अनेन प्रकारेण पिताऽपि सन् सः पुत्र्याः ईच्छायाः सम्मानं करोति।

अतः कुमारसम्भवे नार्याः स्थिति सम्मानजनिका। राष्ट्रियचेतनायाः विषयेऽपि कुमारसम्भवः उल्लेखनीयः। महाकाव्यस्य मङलाचरणः एव 'पृथित्याःमानदण्ड्वत्' स्थित[17] देवात्मनः हिमालयस्य नगाधिराजत्वमेव उदद्योषयन् महाकवेः कालिदासस्य राष्ट्रियायाः चेतनाया प्रबलं प्रमाणं प्रस्तौति महाकविः कालिदासः भारतभूम्याः ललाटे तिलकवत् सुशोभितस्य हिमवतः मङ्लार्चनं कृत्वा भारतभूम्याः एवं सत्वनं करोतीव। पूर्वपश्चिमयो समुद्रेकपरिवृत्तयाः उत्तरे च हिमालयेन सुरक्षितायाः भारतभूमेः एव रेखाङ्कनं कृतम महाकविना। एकतः हिमवतं पृथिव्याः मानदण्ऽत्वेन अभिधीय हिमालयवर्णने भारतवर्षस्यैव स्तवनमस्ति अपरतः राष्ट्रस्य राज्ञश्च अभिन्नम् अभिधानं राजानं विशिष्टै गुणैः युक्तिकरणमेव। देवात्मानं हिमालयं नगाधिराजरूपेण कृतोदबोधनं राष्ट्रराज्ञार्थे कृते अपरिहार्यान्योन्याश्रितसम्बन्धमपि द्योतयति। देवात्मा पदं यत्र राज्ञे द्विव्यासाधारणान् गुणान् अपेक्षते तत्रैव ब्रह्मणा हिमालयं नगाधिराजेति सम्बोधनं तस्य कृते सार्थकगुणसमूहस्य अनिवार्यतायां विशिष्टं बलं ददाति। हिमालयं शैलाधिराजेति सम्बोधनं ब्रहमण तस्य यज्ञीयसाधनानां जनकत्वेन च वसुन्धरां धारकत्वेन दत्तम्।[18] तदनन्तरं महाकविः भारतभूम्याः तिलकस्वरूपेण हिमवतः यशोगानं कृत्वा स्वराष्ट्रप्रेम्णः एवं परिचयं ददाति। पृथ्वीरूपां गां दुहयमानः हिमालयरूपो वत्सः देदीप्यमानैः रत्नैश्चौषधिभि सम्पन्नोऽस्ति। राज्ञः कर्तव्येष्वपि महाकाव्योऽयम् आदर्शः। कुमारसम्भवे राज्ञः इन्द्रस्य वर्णनमस्ति। ब्रहम्णः स्तुत्यनन्तर राजा इन्द्रः प्रार्थनार्थं बृहस्पतिम् अधिकरोति। ब्रहमण लोककल्याणार्थं तारकवधाय शिवपुत्रं वदति सति इन्द्रः कामदेवं प्रोत्साहयति। शिवविवाहानन्तरं लोककल्याणे विलम्बात् सः अग्निदेवं ध्यानाकर्षणाय प्रेषयति। यत्र शिवेन छद्मरूपेण कपोतरूपे स्थितस्य अग्निदेवय शरीरे रेतसाधाने विक्षुब्धमग्निदेवं गंगां प्रति प्रेषयति। गंगा शिववीर्यं समादरेण गृहणाति। एवञ्च गंगां अभिषेकाय आगतासु कृतिकासु शिववीर्यः गर्भरूपैण अतिष्ठत। ताभिः कृतिकाभि भयलज्जाभ्यां सः शिववीर्यः शराकाण्डेषु त्यक्तः। तथा चान्ते सः षण्मुखकार्तिकरूपेण प्रकटोबभूव। इन्द्रादिदेवाः कार्तिकेयस्य नेतृत्वे तारकासुरेण सह संघषञ्चक्रुः अन्ते च तारकं विजयित्वा कार्तिकेयस्य अभिनन्दनं चकार। अनेन प्रकारेण इन्द्रः राजरूपेव लोक रक्षार्थ स्वकीयस्य कर्तव्यस्य सम्यक् पालनं करोति।

प्रजायाः कर्तव्येऽपि महाकाव्योऽयं आदर्शः। राज्ञः हिमालयस्य प्रजारूपे अप्सरस् किन्नरकिरातविद्याधराणाम् उल्लेखः प्राप्यते। देवभूमिः हिमालयः सिद्धितपस्वीनां तपोस्थली वर्तते। तदपि प्रचूरसाधनत्वात् भूमिरियं किरातादीनां कृते मनोरथपूर्णा काम्यभूमिरस्ति। पार्वत्याः विवाहावसरे प्रजायाः सहभागिता राजाप्रजयोः मधुरसम्बन्धस्य द्योतिका। अनेनैव प्रकारेण देवराजेन्द्रस्य प्रजारूपेण कामाग्न्योः कर्तव्यानामुल्लेखः कृतम्। इन्द्रादेशं शिरोधार्य कामदेवः प्राणार्पणेनापि कर्तव्य पूपूर्षति। अनेनैव प्रकारेण अग्निदेवोऽपि राज्ञः आज्ञा अनुल्लङघनीया स्वीकरोति।[19]

विश्वकल्याणस्य भावनापि अस्मिन् महाकाव्ये प्राचुर्येण प्राप्नोति। यथा सप्तर्षिभिः पृष्टः शिवोवदति यत् भवन्तः विदितमेव मम किमपि कार्यं स्वार्थाय न भवति। ममाष्टमूर्तयः अस्मिन् विषये प्रमाणानि। ततः यथा तृष्णातुरचक्रवाकः वृष्टये मेघं याचयति तथैव तारकासुरेण पीडितैः देवैः पुत्रोपन्नये याचितोऽहम्। अग्नेः उत्पत्तये यथा यजमानः अरण्यानयनाय तत्परोभवति तथैवाहम् पुत्रोत्पत्तये पार्वतीमिच्छामि। तारकासुरे व त्रस्तानां ब्रहमाणं प्रति देवानां वाक्यमिदमपि लोककल्याणस्य द्योतकं यत् तारकासुरस्य भयात् अवरूद्धमार्गाः देवाः लोकदर्शनसुखप्रापणे अशक्ताः सन्ति। अतः देवानामपि लोक दर्शनार्थिनी उत्कण्ठा तेषां लोककल्याणमयीभावनाया एव द्योतिनी। धार्मिक मूल्यषेवपि महाकाव्योऽयम् अन्ययतमः। अत्र धार्मिक मूल्यरूपे तपसः अनेकशः वर्णनं प्राप्यते। सर्वप्रथम महादेवः एवं तपस्यः दर्शितः।[20] अपसरसां गायनं श्रतुत्वाऽपि शिवः तपसि एव आस्थत्। यतोहि मनोजित्भ्यः विघ्नानि कदापि तपोभङगस्य कारणापिन न भवन्ति। शिवः अन्तःकरणे परमात्मनः साक्षात्कारं कृत्वा समाधिस्यो बभूव। शिवेन समाधिमङ्गत्वात् भस्मान्ते कामे देवी पार्वत्यापि तपसा एवं स्वसौन्दर्य सफलीकरयाय ईक्षाञ्चक्रे। शिव वररूपेण प्राप्यकामा पार्वती पितुः इच्छया तपसे गौरीशिखराय प्रास्थितवती। तदनन्तरं पार्वती तापसवेषम् अधारयत्। अतः तपसः अपि अस्मिन् महाकाव्य स्थापनं वर्तते। एवमेव प्रकारेण अन्येषु काव्येष्वपि लोककल्याणम् अनुसंधातव्यम्।

## संदर्भ ग्रंथ


1. भारतीय संकृति में मानवमूल्य एवं लोक कल्याण 1 पृष्ठ संख्या 38।
2. वही पृ0 संख्या 40।
3. कुमार सम्भवः 1/54।
4. वही 1/57।
5. वही 5/30।
6. वही 1/58।
7. वही 6/13।

8. वही 6/50।
9. वही 1/1।
10. वही 2/64।
11. वही 3/73।
12. वही 6/3।
13. वही 5/13।
14. वही 1/27।
15. वही 6/85।
16. वही 6/88।
17. वही 1/1।
18. वही 1/17।
19. वही 3/23।
20. वही 1/57।